कक्षा नवमीं
आदर्श प्रश्न पत्र
संस्कृत

समयः होरात्रयम् | पूर्णांकः 80

'क' खण्डः
अपठित–अवबोधनम

**प्र01 अधोलिखितम् अनुच्छेदम् अधिकृत्य निर्देशित– प्रश्नानाम् उत्तराणि दीयन्ताम्। (5)**

समागतः वसन्तः। स्वगतं ते ऋतुराजः। त्वमेव कुसुमाकरः। तवागमनं भवति पुष्पाणां विकासः सौरभाणां च प्रसारः। अतःतवागमनं सर्वान् जनान् आनन्दयति निखिलान् प्राणिनः प्रीणयति चराचरं च रमयति। इदानीं वारिणः अत्यधिकं शैत्यं विलीयते। उल्लासस्य उत्साहस्य च सर्वत्र साम्राज्यं राजते। स्वच्छता एव परितः दृश्यते।

(i) एक पदेन उत्तरत– 2
(क) कास्यागमने पुष्पाणां विकासः भवति?
(ख) वसन्तस्य आगमने केषां प्रसारः भवति?
(ii) पूर्णवाक्येन उत्तरत– 1
(क) वसन्तागमने किं–किं भवति?
(iii) निर्देशानुसारम् उत्तरं चित्वा लिखत्– 2
(क) 'त्वमेव कुसुमाकर' अत्र 'त्वम्' इति सर्वनाम पदं कस्मै प्रयुक्तम्?
(i) स्वागताय (ii) विकासाय (iii) पुष्पाय (iv) वसन्ताय
(ख) 'स्वच्छता' इति पदस्य विलोमपदम् चिनुत्?
(i) अस्वछता (ii) प्रसारः (iii) शैत्यं (iv) दृश्यते

**प्र02 अधोलिखितम् अनुच्छेदम् पठित्वा अनुछेदाधारित प्रश्नानाम् उत्तराणि दीयन्ताम्। (7)**

एकदा गाइल्सनामा विद्यालयस्य निरीक्षकः विद्यालयं आगतः। तत्र एकस्यां कक्षायां बालानां वर्णविन्यासं अपृच्छत–मोहनदासः केट्ल इत्यस्य शब्दस्य वर्णविन्यासं कर्तुं नाशक्नोत्। आत्मनः सन्दिग्धां प्रतिष्ठां चिन्त्यमानाः शिक्षकः आतड्किंतः अभवत्। सः शिक्षकः निकटस्य श्यामपट्टतः शुद्धां वर्तनीम् अनुकर्तुं मोहनदासं प्रैरयत्। यद्यपि तदानीं निरीक्षकस्य ध्यानम् अन्यत्र असित, तथापि मोहनदासः सम्मुखं अवलोकयन् अपि शिक्षकस्य अनुकरणं नाकरोत्। सहपाठिनाम् उपहासभूमिः भविष्यामि, शिक्षकस्य कोपभाजनतां च गमिष्यामि इत्यादि सः न अचिन्तयत्।

(i) एक पदेन उत्तरत– 2
(क) मोहनदासः कस्य शब्दस्य वर्णविन्यासं कर्तुम् नाशक्नोत् ?
(ख) गाइल्सनामा कुत्र आगतः?
(ii) पूर्णवाक्येन उत्तरत– 1
(क) तस्य शिक्षकः किमर्थम् आतड्किंतः अभवत्?
(iii) गद्याशं पठित्वा तृतीयांशतुल्यं सारं लिखत। 2
(iv) प्रदत्त गद्यांशस्य उचितं शीर्षकं लिखत। 1
(क) सत्यनिष्ठः मोहनदासः गान्धी (ख) निरीक्षकः
(ग) शिक्षकस्य अनुकरणम् (घ) शब्दस्य वर्णविन्यासम्
(v) कक्षायाम अस्य पदस्य विभक्ति वचनम् च लिखित् ? 1

Downloaded from cclchapter.com

## 'ख' खण्डः
### रचनात्मकं कार्यम्

प्र03 मञ्जूषातः उचित पदानि चित्वा पत्रे रिक्त स्थानानि पूरयन्तु– (5)

(मम, अस्माकम्, विनोदः, ध्वजा, सस्नेहम्, विद्यालये, पारितोषिकान्, नमस्ते, वार्षिकोत्सवम्ः, मुख्यातिथिः)

प्रियमित्र (i)_________

(ii)_________

अत्र कुशलं तत्र समीहे। अहं स्व–विद्यालयस्य (iii)_________ वर्णयामि। मासपूर्वमेव (iv)_________ सर्वे अध्यापकाः छात्राः च कार्येषु व्यस्ताः आसन्। उत्सवस्यावसरे (v)_________ विद्यालयः नववधूः इव भूषितः आसीत्। इतस्ततः मार्गेषु विविधवर्णा (vi)_________ दोधूयन्ते स्म। शिक्षा–निदेशकः कार्यक्रमस्य (vii)_________ आसीत्। सः कार्यक्रमम् अतीव प्राशंसत्। योग्येभ्यः छात्रेभ्यः च (viii)_________ अयच्छत्। गृहे सर्वेभ्यः (ix)_________ प्रणामाः।

(x)_________ भवतः मित्रम्

क, ख, ग।

प्र04 अधोलिखित विषयेषु एकं विषयम् अधिकृत्य पञ्च वाक्यानि लिखत– (5)

(i) स्वतन्त्रतादिवसः

(ii) पर्यावरणम्

(iii) विजयादशमी

## 'ग' खण्डः
### अनुप्रयुक्त–व्याकरणाम्

प्र05 अधोलिखित पदेषु सन्धि अथवा सन्धि–विच्छेदं कुरूत। (षड्) (6)

(क) नायकः = ________ + ________

(ख) मनोरथः = ________ + ________

(ग) नरेन्द्रः = ________ + ________

(घ) वागीशः = ________ + ________

(ङ) गीता + उपदेशः = ________ + ________

(च) इति + उक्त्वा = ________ + ________

(छ) रमा + ईशः = ________ + ________

प्र06 निम्नलिखित वर्णानां समुचितं उच्चारण स्थानं कोष्ठात् चित्वा लिखत्। (पञ्च) (5)

(क) ब – (तालु / ओष्ठ)

(ख) घ – (दन्त / कण्ठ)

(ग) झ – (मूर्घा / तालु)

(घ) व – (दन्तोष्ठ / तालु)

(ङ) ह – (कण्ठ / मूर्धा)

(च) ई – (तालु / कण्ठ)

प्र07 अद्योलिखित–वाक्येषु प्रकृति–प्रत्ययोः संयोगेन निर्मितानां शब्दानां प्रयोगेन रिक्त स्थानानि पूरयत। (पञ्च) (5)

(क) छात्रैः पुस्तकं _________ । (पठ् + अनीयर्)

(ख) रामः समाचारं _________ रोदति। (श्रु + क्त्वा)

(ग) _________ तृणं खादति। (अज + टाप्)

(घ) त्वं रामायणं _________ इच्छसि। (पठ् + तुमुन्)

(ङ) _________ छात्रः इतस्ततः पश्यति। (पठ् + शतृ)

(च) पुत्रः पितरं _________ विद्यालयं गतवान्। (प्र + नम् + ल्यप्)

Downloaded from cclchapter.com

**प्र08 अद्योलिखित–शब्देषु उचित विभक्ति वचनानुसारं पदं विचित्य रिक्त स्थानानि पूरयत– (षड्) (6)**

(क) _________ नमः।
(i) गुरूम् (ii) गुरवे (iii) गुरोः (iv) गुरूणाम्

(ख) _________ कुत्र पठथ।
(i) त्वम् (ii) युथम् (iii) त्वया (iv) युवाम्

(ग) मम _________ नामः रामः अस्ति।
(i) मित्रम् (ii) मित्रयोः (iii) मित्रस्य (iv) मित्राणि

(घ) _________ धावतिः।
(i) लता (ii) लते (iii) लतयोः (iv) लतः

(ङ) _________ शनैः शनैः धावन्ति।
(i) तौ (ii) सः (iii) ते (iv) त्वम्

(च) _________ प्रजाः पालनीयाः।
(i) नृपात् (ii) नृपेण (iii) नृपम् (iv) नृपौ

(छ) _________ दीपं प्रज्वालयति।
(i) राधा (ii) राधाः (iii) राधाम् (iv) राधायै

**प्र09 अद्योलिखित धातुषु उचित पुरूष वचनानुसारं पदं विचित्य रिक्त स्थानानि पूरयत– (षड्) (6)**

(क) सीता शक्त्यानुसारम् _________।
(i) अधावत् (ii) अधावन (iii) अधावः (iv) अधावम्

(ख) अहम् सदा सत्यं _________ ।
(i) वदति (ii) वदसि (iii) वदामि (iv) वदन्ति

(ग) रमा पुस्तकं _________ ।
(i) पठिष्यसि (ii) पठिष्यथः (iii) पठिष्यामः (iv) पठिष्यति

(घ) गजाः _________ ।
(i) धावति (ii) धावन्ति (iii) धावसि (iv) धावामि

(ङ) ताः पत्रम् _________ ।
(i) लिखति (ii) लिखथ (iii) लिखन्ति (iv) लिखामि

(च) वृक्षात् पत्राणि _________ ।
(i) पतति (ii) पतन्ति (iii) पतसि (iv) पतसी

(छ) अश्वाः _________।
(i) धावति (ii) धावन्ति (iii) धावसि (iv) धावथ

**'घ' खण्डः**
**पठित–अवबोधनम**

**प्र010 (अ) अद्योलिखित गद्यांशेषु कस्यचित् एकस्य गद्यांशस्य हिन्दी भाषायां अनुवादः विधीयताम्। (5)**

**(क)** श्वेतकेतुः– भगवन्! वाचमपि विज्ञापयतु।
आरूणिः– सौम्य ! अश्यमानस्य तेजसो योऽणिमा, सः ऊर्ध्वः समुदीषति। सा खलु वाग्भवति। वत्स! उपदेशान्ते भूयोऽपि त्वां विज्ञापयितुमिच्छामि यत्, अन्नमयं भवति मनः आपोमयो भवति प्राणाः तेजोमयी च भवति वागिति। किञ्च यादृशम् अन्नादिकं गृहाव्ाति मानवस्तादृशमेव तस्य चित्तादिकं भवतीति मदुपदेशसारः।

**(ख)** बृहन्नला–अभिमन्यो!
अभिमन्युः– कथं कथम्? अभिमन्युर्नामाहम्। भोः किमत्र विराटनगरे श्रत्रिय–वंशोद्भूताः नीचैः अपि नामभिः अभिभाष्यन्ते अथवा अहं शत्रुवशं गतः। अतएव तिरस्क्रियते।
बृहन्नला–अभिमन्यों! सुखमास्ते ते जननी?
अभिमन्युः–कथं कथम? जननी नाम? किं भवान् मे पिता अथवा पितृव्यः? कथं मां पितृवदाक्रम्य स्त्रीगतां कथां पृच्छति?

Downloaded from cclchapter.com

प्र010 (आ) अद्योलिखितयोः पद्यांशयोः कस्यचित् एकस्य पद्यांशस्य हिन्दी भाषायां अनुवादः क्रियताम्। (5)

(क) निवर्तय मतिं नीचां परदाराभिमर्शनात्।
न तत्समाचरेद्धीरो यत्परोऽस्य विगर्हयेत्।।

(ख) यत्रापि कुत्रापि गता भवेयुर्हंसा महीमण्डलमण्डनाय।
हानिस्तु तेषां हि सरोवराणां येषां मरालैः सह विप्रयोगः।।

प्र011 (अ) निम्नलिखित गद्याशं पठित्वा तदाधारित प्रश्नानां उत्तराणि दीयन्ताम्। (5)

परन्तु स्वार्थान्धो मानवस्तदेव पर्यावरणमद्य नाशयति। स्वल्पलाभाय जना बहुमूल्यानि वस्तूनि नाशयन्ति। यन्त्रागाराणां विषाक्तं जलं नद्यां निपात्यते येन मत्स्यादीनाम् जलचराणां च क्षणेनैव नाशो जायते। नदीजलमपि तत्सर्वथाऽपेयं जायते। वनवृक्षा निर्विवेंक छिद्यन्ते व्यापारवर्धनाय, येन अवृष्टिः प्रवर्धते वनपशवश्च शरणरहिता ग्रामेषु उपद्रवं विदधति। शुद्धवायुश्रपि वृक्षकर्तनात् सङ्कटापन्नो जातः। एवं हि स्वार्थान्धमानवैर्विकृतिमुपगता प्रकृतिरेव तेषां विनाशकर्त्री सञ्जाता। पर्यावरणे विकृतिमुपगते जायन्ते विविधा रोगाः भीषणस्मस्याश्च। तत्सर्वं इदानीं चिन्तनीयं प्रतिभाति।

(क) एक पदेन उत्तरत– 2

(i) मानवः कीदृशः अभवत्?

(ii) शुद्धवायुः कस्मातः सङ्कटापन्नः जातः?

(ख) पूर्णवाक्येन उत्तरत– 1

(i) विविधाः रोगाः कथं जायन्ते?

(ग) निर्देशानुसारम् उत्तरत– 2

(i) 'नाशयति' इति क्रियायाः कर्तृपदं किमत्र?

(ii) 'शरणरहिताः' इत्यस्य विशेष्यपदं किम्?

प्र011 (आ) गुणेष्वेव हि कर्त्तव्यः प्रयत्नः पुरूषैः सदा। (5)
गुणयुक्तो दरिद्रोऽपि नेश्वरैरगुणैः समः।।

(क) एकपदेन उत्तरत– 2

(i) पुरूषैः केषु प्रयत्नः कर्त्तव्यः ?

(ii) कीदृशः दरिद्रः श्रेष्ठः कथितः?

(ख) पूर्णवाक्येन उत्तरत– 1

(i) पुरूषैः किं कर्त्तव्यम्?

(ग) निर्देशानुसारम् उत्तरत– 2

(i) 'गुणेष्वेव' अत्र सन्धिच्छेदं कुरूत?

(ii) 'प्रयत्नः' अत्र कः उपसर्गः प्रयुक्तः?

प्र012 रेखांकितपदान्यधिकृत्य प्रश्नानां निर्माणं कुरूत– (चतुर) (4)

(क) श्वेतकेतुः <u>वाग्विषये</u> पृच्छति।

(ख) <u>भवता</u> घृतोत्पत्तिहस्यं व्याख्यातम्।

(ग) अजातशिशुः <u>मातृगर्भे</u> सुरक्षितः तिष्ठति।

(घ) <u>वनवृक्षाः</u> निर्विवेकं छिद्यन्ते।

(ङ) <u>गुरूगृहं</u> गत्वैव विद्याभ्यासः कारणीयः।

Downloaded from cclchapter.com

**प्र013 यथानिर्दिष्ट कुरूत—** **(6)**

(क) पर्यायपदानि योजयत— (2)

| | |
|---|---|
| (i) सरस्वती | समीरः |
| (ii) आम्रम | तीरे |
| (iii) पवनः | रसालः |
| (iv) तटे | वाणी |

(ख) अद्योलिखितानां पदानां विलोमपदानि मञ्जूषायां दत्तेषु पदेषु चित्वा लिखत— (2)

(हसन्ती, पुण्यकर्मणा, अनार्य, देवेन्द्रेण)

(i) विलपन्ती

(ii) आर्य

(iii) राक्षसेन्द्रेण

(iv) पापकर्मणा

(ग) विशेषणैः सह विशेष्याणि योजयत— (2)

| | |
|---|---|
| (i) आस्वाद्यतोयाः | खलानां मैत्री |
| (ii) गुणयुक्तः | सज्जनानां मैत्री |
| (iii) दिनस्य पूर्वार्द्धभिन्ना | नद्यः |
| (iv) दिनस्य परार्द्धभिन्ना | दरिद्रः |

*******************************

Downloaded from cclchapter.com